# ॐ श्री परमात्मने नमः। अथ सप्तदशोऽध्यायः। श्रद्धात्रयविभागयोगः।

| | |
|---|---|
| अर्जुन उवाच<br>ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।<br>तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥ १॥ | अनुद्वेगकरं वाक्यम् सत्यं प्रियहितं च यत्।<br>स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ १५॥ |
| श्रीभगवानुवाच<br>त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।<br>सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥ २॥ | मनःप्रसादः सौम्यत्वम् मौनमात्मविनिग्रहः।<br>भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥ १६॥ |
| सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।<br>श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्धः स एव सः॥ ३॥ | श्रद्धया परया तप्तम् तपस्तत्त्रिविधं नरैः।<br>अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥ १७॥ |
| यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।<br>प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥ ४॥ | सत्कारमानपूजार्थम् तपो दम्भेन चैव यत्।<br>क्रियते तदिह प्रोक्तम् राजसं चलमध्रुवम्॥ १८॥ |
| अशास्त्रविहितं घोरम् तप्यन्ते ये तपो जनाः।<br>दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥ ५॥ | मूढग्राहेणात्मनो यत् पीडया क्रियते तपः।<br>परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥ १९॥ |
| कर्शयन्तः शरीरस्थम् भूतग्राममचेतसः।<br>मां चैवान्तःशरीरस्थम् तान्विद्ध्यासुरनिश्चयान्॥ ६॥ | दातव्यमिति यद्दानम् दीयतेऽनुपकारिणे।<br>देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥ २०॥ |
| आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।<br>यज्ञस्तपस्तथा दानम् तेषां भेदमिमं शृणु॥ ७॥ | यत्तु प्रत्युपकारार्थम् फलमुद्दिश्य वा पुनः।<br>दीयते च परिक्लिष्टम् तद्दानं राजसं स्मृतम्॥ २१॥ |
| आयुःसत्त्वबलारोग्य- सुखप्रीतिविवर्धनाः।<br>रस्याः स्निग्धाः स्थिरा हृद्याः आहाराः सात्त्विकप्रियाः॥ ८॥ | अदेशकाले यद्दानम् अपात्रेभ्यश्च दीयते।<br>असत्कृतमवज्ञातम् तत्तामसमुदाहृतम्॥ २२॥ |
| कट्वम्ललवणात्युष्ण- तीक्ष्णरूक्षविदाहिनः।<br>आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः॥ ९॥ | ॐ तत्सदिति निर्देशः ब्रह्मणस्त्रिविधः स्मृतः।<br>ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥ २३॥ |
| यातयामं गतरसम् पूति पर्युषितं च यत्।<br>उच्छिष्टमपि चामेध्यम् भोजनं तामसप्रियम्॥ १०॥ | तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।<br>प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥ २४॥ |
| अफलाकाङ्क्षिभिर्यज्ञः विधिदृष्टो य इज्यते।<br>यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥ ११॥ | तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।<br>दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥ २५॥ |
| अभिसन्धाय तु फलम् दम्भार्थमपि चैव यत्।<br>इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ १२॥ | सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।<br>प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥ २६॥ |
| विधिहीनमसृष्टान्नम् मन्त्रहीनमदक्षिणम्।<br>श्रद्धाविरहितं यज्ञम् तामसं परिचक्षते॥ १३॥ | यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।<br>कर्म चैव तदर्थीयम् सदित्येवाभिधीयते॥ २७॥ |
| देवद्विजगुरुप्राज्ञ- पूजनं शौचमार्जवम्।<br>ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १४॥ | अश्रद्धया हुतं दत्तम् तपस्तप्तं कृतं च यत्।<br>असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥ २८॥ |

ॐ तत् सत्

इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥